# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ६२

हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः ।
ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम् ॥१॥

दिष्ट्या ते विजयो वत्स दिष्ट्य लवणराक्षसः ।
हतः पुरुषशार्दूलवरं वरय राघव ॥२॥

वरदाः स्म महाबाहो सर्व एव समागताः ।
विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः ॥३॥

देवानां भाषितं श्रुत्वा शूरो मूर्ध्नि कृताञ्जलिः ।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान् ॥४॥

इमां मधुपुरीं रम्यां मधुरां देव निर्मिताम् ।
निवेशं प्राप्नुयां शीघ्रमेष मेऽस्तु वरो मतः ॥५॥

तं देवाः प्रीतमनसो बाढमित्येव राघवम् ।
भविष्यति पुरी रम्या शूरसेना न संशयः ॥६॥

ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा ।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयत् ॥७॥

सा सेन शीघ्रमागच्छच्छ्रुत्वा शत्रुघ्नशासनम् ।
निवेशनं च शत्रुघ्नः शासनेन समारभत् ॥८॥

सा पुरी दिव्यसङ्काशा वर्षे द्वादशमे शुभा ।
निविष्टा शूरसेनानां विषयश्चाकुतोभयः ॥९॥

क्षेत्राणि सस्य युक्तानि काले वर्षति वासवः ।
अरोगा वीरपुरुषा शत्रुघ्नभुजपालिता ॥१०॥

अर्धचन्द्रप्रतीकाशा यमुनातीरशोभिता ।
शोभिता गृहमुख्यैश्च शोभिता चत्वरापणैः ॥११॥

यच्च तेन महच्छून्यं लवणेन कृतं पुरा ।
शोभयामास तद्वीरो नानापण्यसमृद्धिभिः ॥१२॥

तां समृद्धां समृद्धार्थः शत्रुघ्नो भरतानुजः ।
निरीक्ष्य परमप्रीतः परं हर्षमुपागमत् ॥१३॥

तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम् ।
रामपादौ निरीक्षेयं वर्षे द्वादशमे शुभे ॥१४॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com